ॐ

कालचक्रम्

प्रणेता :—

लक्ष्मनसिंहः अग्रवालः

© सर्वाधिकाराः सुरक्षिताः

★

प्रथमम् संस्करणम्
अक्तूबर १९८६

★

मूल्यम् :
दशरूप्यकानि

347

समर्पणम्

कालचक्रे नामास्मिन् पद्यजाते कालशक्तेः प्रचण्डत्वं संस्थापितम्। स्पष्टमेव विषयोऽयं नितरां प्राचीनः, पूर्वेषु च तेषु तेषु ग्रन्थेषु नाल्पतयोपन्यस्तः तथापि युगचित्रणेन यथासम्भवं सरसतां नीतः इत्यनुभविष्यते। मम दृष्टिकोणः सर्वास्वेव कृतिषु मामिकासु राष्ट्रपरको जनतापरकश्च विद्यते, अत इयमपि रचना जनतायै एव समर्पिता।

वीतमृत्यु नाम द्वितीया कविता प्रागेव पद्यपुष्पवाटिकायां त्रिष्टुभि प्रकाशिता। अत्र सा शालिन्यां छन्दसि परिवर्तिता। अस्या हिन्दीभावानुवादोऽपि मदीयैव रचना। आशास्यते कवितादृतयमिदं सहृदयानामानन्दकरं सेत्स्यति। अत्र सन्धयो मुद्रणसौविध्यमालक्ष्य यत्र तत्र नादृता।

— लछमनसिंहः अग्रवालः

ॐ

कालचक्रम्

अपारसंसृतिजलधिं तितीर्षवो,
महाधियो यतनयनादिकेन्द्रियाः ।
व्रजन्ति यं शरणमनन्तवैभवः
स केशवो हरतु ममार्तिमुल्वणाम् ।। १ ।।

गुणव्यतिकरे लोके, तस्थुर्जङ्गमसङ्गमे ।
प्राप्यन्ते चित्रदृश्यानि, सनेत्रश्रवणैर्जनैः ।। २

चक्रं कालात्मनो विष्णोर्बलीयः सततं चलत् ।
नूतनयति संसारं प्रसह्यपरिवर्तयत् ।। ३ ।

विधुर्न पूषा न शनिर्न शुक्रो,
गिरिर्न सिन्धुर्न नदी न वृक्षः ।
नरो न नेता न पशुर्न हिंस्रः
प्रभुर्विहन्तुं प्रशिषं तदीयाम् । ।४ ।।

क्व ते गता मनुजवराः सुबुद्धयो,
जितेन्द्रिया मृदुलकठोरचेतसः।
न सत्पथादसुविरहेऽप्युपस्थिते,
व्यरंसिषुर्द्रविणहृतिं विमृश्य वा ॥ ५ ॥

यवनाः कदाचिद्गमन् गरिष्ठता—,
मुदिताः कदाचिदपि मिस्रलोमजाः।
अवनीभृतः सुबहवो गतागता,
नितरां हि कालविहृतिर्बलीयसी ॥६ ॥

क्षणे क्षणे जीर्यत एष जन्तु—
र्द्रव्याणि सर्वाणि च विश्वजानि।
वैधेय एषोऽस्ति विकत्थते यः,
छिनद्मि कालं स हि विश्वसालः ॥ ७ ॥

यमस्य पुत्री मृतिनामधेया,
ह्यटाट्यमाना भुवनानि भीमा।
पप्रच्छ सा देवऋषिं नियोगम्,
भूतानि खादेति मुनिर्दिदेश ॥८ ॥

भूतानि सा खादति तस्य दिष्ट्या,
ह्यतृप्तचण्डिष्ठतृषाशनाया।
अलं न सा किन्तु विहन्तुमिच्छाम्
कालाभिधानस्य भवाधिपस्य ॥ ९ ॥

तदिङ्गितेनैव प्रभञ्जनौघौ *
भूकम्पकुम्भीनसवह्निमार्याः ।
युद्धानि विद्युद् गरलं स्वघातः
शूलो रिपुर्दस्युजना वृकाद्याः ॥ १० ॥

भूतेषु हन्तुं ददति प्रहारान्,
क्षिपन्ति कृत्वा विघसानमुष्यै ।
एवं शवानेव मृतिः क्षुधार्ता,
भुङ्क्ते वराकी कुणपाशनी सा ॥ ११ ॥

क्षुधं समालोकयता कदाचित्,
तेनादसीयामविरामवेगाम ।
आपातयुक्तिः क्रियते विचित्रा
या श्रूयमाणैव भयङ्करी नुः ॥ १२ ॥

उपेक्षते स्वं करणीयकृत्यं,
लोभप्रमादादिवशाद् यदा ना ।
भूपालपुर्यामिव जन्तुजालम्,
मृतं वराकं कवलायतेऽस्याः ॥ १३ ॥

अहंयवो लोभपरायणा जनाः,
कुस्त्रापतेयैर्ह्रियमाणचेतसः ।

---

* प्रेङ्खे विभाषा, इति न छन्दोभङ्गः

अजानतस्तान् कृतयात्रिपत्रको,
कालो विमानेन यथा परत्रनुद् ॥ १४ ॥

अयि निर्मम भारतेन तत्,
कतमज्जन्मकृतं प्रभुज्यते ।
धिगिदं सुधियां स्वतंत्रताम्
गुरुराष्ट्रं द्विषतां समार्पयत् ॥ १५ ॥

अनेन सोढासु परम्परासु,
सहस्रवर्षीषु सुखेतराणाम् ।
का का न घोरा निकृतिर्निकृष्टा,
मनस्विनां म्लानिकरी नृलोके ॥ १६ ॥

उच्चादर्शान् भजत् त्वेनत्, क्षुण्णं क्षुल्लकलुब्धकैः ।
परिवृत्तं यतोऽनेन यथाकालं न धर्मिणा ॥ १७ ॥

न नासन् वीरयोद्धारो द्विषां संरम्भरोधिनः ।
न नानेन जितं युत्सु मानवत्वाय दण्डितम् ॥ १८ ॥

आस्तां दूषणमन्येषां दौर्बल्यं निन्द्यतां स्वकम् ।
ऐक्यं नाम पदं भूतेस्तत्र मुह्यति भारतम् ॥ १९ ॥

राज्यं स्वीयं नाल्पशुल्केन लब्धम्,
भेदाविष्टैर्नीयते दुर्भगत्वम् ।

न्याय्यान्याय्यं मार्गमाश्रित्य मूले,
कष्टं मातर्नेतृता हन्ति हैक्यम् * ॥ २० ॥

त्वचमेव रिपुर्हन्ति, मर्म हन्ति सुहृत्तमः ।
प्रहारा द्विषतां साध्या अन्येषां न प्रतिक्रिया ॥ २१ ॥

क्रियते यैः कणेहत्य राष्ट्रैक्यस्य विनाशनम् ।
शासकैस्ते विभूष्यन्ते देशभक्ताद्युपाधिभिः ॥ २२ ॥

लिपिकः शुद्धचेता यः, स्वकर्त्तव्यपरायणः ।
लुब्धकान्मन्त्रिणः श्रेयान् गरीयान् मातृवत्सलः ॥ २३ ॥

कूटनीतिरथ दर्शनं च यद्,
गूढतत्त्वपटुनिर्णये क्षमम्,
प्राकृतस्य न जनस्य शर्मकृत्,
स्याद् यथाऽनघ चरित्रवर्णनम् ॥ २४ ॥

सच्चरित्रसुलभाः सुसंपदः,
सर्वदा ननु परत्र चेह च ।
अत्र ये न सुधियो दरिद्रति,
तानहो न वृणते न भूतयः ॥ २५ ॥

---

* हा + ऐक्यम्

बुद्ध्या कश्चित् कोऽपि शारीरशक्त्या,
वित्तेनान्यो विद्यया कोऽपि नीत्या।
राष्ट्रं स्वीयं सेवते लोकयत्नाद्,
भूतिं याता भारतं नैककार्यात् ॥ २६ ॥

सन्त्यद्यापि शुचिव्रता नरवराः सत्यश्च योषा भुवि,
देशे भक्तियुता अलुब्धमनसः सेवापराः कर्मिणः।
सन्तः प्राणभृतः परोपकृतये त्यागैकनिष्ठा बुधाः,
कष्टं तच्चरितं प्रकाशनमलं वार्तासु नो गच्छति ॥ २७ ॥

अहो काल गुरो शक्तिर्दूषिणी ते बलीयसी।
आविल्यन्ते ययोदात्ता भवता नः परम्पराः ॥ २८ ॥

उपकृतं नृलोकस्य, महीयोभिरनेकधा।
प्रतिबद्धै रतत्तुल्यैः, शिष्यैः किं न विनाशितम् ॥ २९ ॥
मा नो देहि प्रभो बुद्धान्, यदि दत्सेऽमरान् कुरु।
नो चेदियं धरा हृद्या शनकैरूषरायते ॥ ३० ॥

साधारणो न सुखमानलवातिरिक्तम्,
किञ्चज्जनो जगति वाञ्छति रक्षितः सन्।
आकाशसम्मितत्रिषो बहुशिक्षिताख्याः,
क्षिण्वन्ति पापचरितैर्जनजीवनं स्वैः ॥ ३१ ॥

चिरं जीव क्षपे देवि ! विस्मर्तुं या ददासि नः ।
देशदेशान्तरव्यापि शिक्षितलोकनर्तनम् ॥ ३२ ॥

एके जार्ति क्रेडयन्ते समग्राम्,
दस्यूनन्ये पालयन्ति प्रजाशान् ।
स्वार्थान् क्षुद्रान् दुर्नयैः साध्नुवन्ति,
कष्टं क्षेत्रं ग्रस्यते क्षेत्रवृत्या ॥ ३३ ॥

प्रभवति विधिर्यस्मिन् दुर्बलेष्वेव शासने ।
बिभेति सबलेभ्यश्च, सता किं तेन वाऽसता ॥ ३४ ॥

यशसा विश्ववन्द्यानां, परिष्वक्ता सदाऽनघा ।
आच्छादयिष्यते भूमिः शीघ्रं प्रेतसमाधिभिः ॥ ३५ ॥

भेदबीजं वपन् राष्ट्रे नेता नामाभिधास्यसे ।
प्रतिमां लप्स्यसे मृत्वा मह्यास्तु वा न जीवताम् ॥ ३६ ॥

स्मारकाणां विनिर्माणे किं वृत्तेन प्रयोजनम् ।
किं यदि खण्डितं राष्ट्रं नृतन्त्रं तेन सेवितम् ॥ ३७ ॥

यस्य यत्र यदा यावत् साध्योभवति साधनम् ।
तस्य तत्र तदा तावदागन्ता व्यसनं ध्रुवम् ॥ ३८ ॥

यः स्वदेशे दुराचारः, परस्मिन् स्यात्स नैतिकः ।
कुर्वन् व्रीडे च तं तत्र, नूनमात्मा न वञ्च्यते ॥ ३९ ॥

गतासौ भारते जाते, गतासुं विद्धि काश्यपीम् ।
सम्प्रदायविभक्तेयमात्मघातं विधास्यते ॥ ४० ॥

रूसामेरिकयोर्युद्धे, शीते वा यदि वोष्णके ।
वसुधा पिष्यते क्लीवा, कृषिः सैरिभयोरिव ॥ ४१ ॥

किं वादैः पठितैस्तैस्तैः, प्राच्यपाश्चात्यसूत्रितैः ।
लोककल्याणमुद्दिश्य, शिवः पन्था यथार्हता * ॥ ४२ ॥

काव्यं शोधयिता लोकमिति चित्तानुरञ्जना ।
पात्रता नास्ति सर्वस्य साहित्य स्वदते यया ॥ ४३ ॥

यत्किञ्चिच्चेष्टमानस्य, यत्किचिद्वादिनो यदि ।
श्रेयो लोकस्य संसिध्येत् किमनागतचिन्तया ॥ ४४ ॥

समाजे बुद्धिदाः सर्वे, संजाते कार्यविप्लवे ।
मन्त्रकाले समस्तानां कुण्ठीभवति शेमुषी ॥ ४५ ॥

---

*यार्हो व्यवहारः शिवः पन्थाः, इति भावः ।

जितनानाभिमानोऽपि प्रसीदत्सत्त्वसाधकः ।
निरभिमानमानी स्यादहोऽभिमानशौण्डता ॥ ४६ ॥

यातायातसुखादद्य देशतीर्थानि सर्वतः ।
*सेलागेहानि जातानि नष्टशान्तीनि यात्रितः ॥ ४७ ॥

बालकैर्मशकैस्तुल्यैर्भूयःसंख्यैर्नवे युगे ।
कोलाहलेन दंशेन, क उद्वेगं न नीयते ॥ ४८ ॥

अन्नानि पानानि विषप्रदानि
वायुश्च दोषैर्विविधैर्विषाक्तः ।
शब्दोऽपि मस्तिष्कबलं छिनत्ति,
चण्डो जनः प्राणिति का गतिर्वा ॥ ४९ ॥

अहो कालौ गतः श्रीमान् यदा प्रच्छायशीतला ।
भूमिः पदे पदे वृक्षैर्वन्ध्येवाद्य कदर्थिता ॥ ५० ॥

पुत्रतुल्याः पुराऽभूवन्, पादपा व्रतिगेहिनाम् ।
वित्तबन्धोर्जनस्याद्य के पुत्राः के च तत्समाः ॥ ५१ ॥

जातरूपवपुर्दग्धा, नवोढ़ा शुल्कलुब्धकैः ।
द्युम्नदेवे जने जाते, न किंकिल्विषसंभवः ॥ ५२ ॥

---

* सेल् + अ + टाप् = सेला, लोकभाषाणां सैरशब्दः

शुक्लानि गेहानि धनेश्वराणा—
मशुक्लवित्तेन विनिर्मितानि।
भोगैकलक्ष्या : कलहायमानाः,
परस्परं यत्र वसन्ति सभ्याः ॥ ५३ ॥

मदिरा परिवारशान्तिहा,
सुमते हेयचरित्रलक्षणम्।
प्रगते परमद्य भारते,
धिगियं सभ्यसमाजसम्मता ॥ ५४ ॥

युवा शक्तः सद्मन्यनुभवति मर्त्यः प्रभुपदम्,
प्रदाने चादाने प्रभवति तदीयं विधिवचः।
वधूपुत्राकीर्णे पर इव वसन् याति निकृतिम्,
न किं कालक्रीडा नयति मनुजं कश्मलमहो ॥ ५५ ॥

सनातने कालसरित्प्रवाह,
उन्मग्ननमग्ना कियतो न सृष्टि :।
मनीषिणो मूढधियः कदर्या,
उदारवित्ताः सुमुखाः सुमुख्यः ॥ ५६ ॥

सत्यो गृहिण्यः कुलटा रमण्यो,
वृत्तेन रम्याः परतल्प जाराः।

मृगेन्द्रविक्रीडितवीरलोको,
जीवन्मृता भीलुकलोकसंख्या ।। ५७ ।।

आखुद्वयं रात्रिदिनाभिधानम्,
मूलं वयोभूमिरुहस्य जन्तोः ।
अजानतः कृन्तति तीक्ष्णदन्तैः,
को वेद भूमिं निपतेत् कदा सः ।। ५८ ।।

कादम्बरीं मोहमयीं निपीय,
प्रोन्मत्तवत् कार्यरतो नृलोकः ।
चक्रेण घोरेण विमृद्यमानम्,
नात्मानमालोच्य दरं बिभेति ।। ५९ ।।

देहाभिमानी चलचित्रपाङ्क्तम्,
विलोकयन् याति मुदं प्रकामम् ।
तथा विबुद्धस्य जनस्य दृष्टेः,
चित्रायते विश्वमिदं समेजत् ।। ६० ।।

उभे संध्ये शयानस्य पापं पूर्वैः प्रकल्पितम् ।
बालिशा धारणा सेयं कालक्रीडाप्रभावतः ।। ६१ ।।

हिरण्मयी रौप्यमयी सनातनी,

वृष्टिर्नभस्तः पततीह वर्धनी।

अभागिनो यान्ति विमोषमात्मना,

कलिः क्षयानो भवतीति वाग्ध्रुवा ॥ ६२ ॥

भानूदये याति विकासमब्जम्,

कोको यथावद् भजते मुदम् वै।

परं मनुष्यो न जहाति तल्पम्,

दूरं विरूढेऽपि रवौ महात्मा ॥६३ ॥

ब्राह्मे मुहूर्ते उत्थाय ग्रामीणाः संचरिन्त वै।

अजानन्तो महाभागा जुषमाणा हितानिलम् ॥ ६४

प्रत्यूष उत्थाय पुरा मनुष्याः

शौचं विधाय स्म हरिं भजन्ति।

अश्लीलगीतान्यधिशय्यमद्य,

शृण्वन्ति चायं च पिबन्त्यशुद्धाः ॥ ६५ ॥

आदाय पुस्तकभरं खरवाह्यमेके,

बाला अपक्वमतयो द्रुतभुक्ततपीताः।

यानं त्रिचक्रमयमप्यधिरुह्य यान्ति,
केचिद् वजन्ति पदगा दरिता विलम्बात् ॥६६॥

माता पाययति स्तन्यं, पुरा स्माद्यतनी न सा।
अजानाना शिवं स्वस्य शिशोर्वा मण्डनप्रिया ॥ ६७ ॥

कर्णैः सहस्रेण शृणोति दीनम्,
यो भक्तयाच्त्रावचनं परेशः।
स्तोतुं तमाकारयितुं प्रयोगो,
विस्तारकाणां शरणेषु चित्रः ॥ ६८ ॥

सहोदरो यत्र सहोदरत्वम्,
स्वसा स्वसृत्वं च सुतः सुतत्वम्।
पिता पितृत्वं गृहिणी च सत्त्वम्,
पतिः पतित्त्वं भजते गृहं तत् ॥ ६९ ॥

सत्यन्यायपथाद् धीरा, न पदं विचलन्ति ये।
त एव वृद्धशब्दार्हा न मृत्योरवशेषिताः ॥ ७० ॥

दीपावल्याः पुण्यवद्वासरेषु,
घ्रात्वा श्रुत्वा पूतिगन्धं कुशब्दम्।

विस्फोटानां गन्धकस्यास्ति खेदः,
पर्वास्माभिर्दूषितं स्वस्य मेध्यम् ॥ ७१ ॥

दूरस्थपल्लीष्वपि पश्चवर्तिषु,
न यत्र सौविध्यलवस्य संस्थितिः ।
जन्मादि लब्ध्वा शिशवः समुन्नताः
स्वमातृभूमेस्तिलकत्वमागताः ॥ ७२ ॥

स्वातन्त्र्यार्थं पुरा वाण्या जनता यैः प्रबोधिता ।
शतकृत्वो नमस्तेभ्यो धिक् तान् ये भेदसूरयः ॥ ७३ ॥

युवतिं कारणं लोके, युधामाचक्षते जनाः ।
वितथा धारणा तादृग्वासना तत्र कारणम् ॥ ७४ ॥

असत्यं सत्यवेशेऽद्य श्लक्ष्णे दुष्करभेदने ।
हिण्डमानं धरापृष्ठे सद्यो दंशति मर्मणि ॥ ७५ ॥

अप्राप्तकाला व्यतियाति नापद्,
नाप्राप्तकाला च समैति संपद् ।
न सर्वकालं क्षरणं जलस्य,
न सर्वकालं दरदस्ति नृणाम् ॥ ७६ ॥

काले दत्ता राजते गल्हिकाऽ * पि,
भ्रष्टः कालाद् हासजल्पो दुरुक्तिः ।
काले भुक्तं कल्पते पोषणाय,
काले कर्ता जायते श्रीनिवासः ॥ ७७ ॥

आकस्मिकोऽपि दुर्घटनाभिरेष,
जन्तुः प्रयाति निधनं सहसाऽनमीवः ।
अप्राप्तकालमृतमेनमिह ब्रुवन्ति,
कालप्रभावविदुरा वितथां विदुर्गाम् ॥ ७८ ॥

स्वस्थास्ते ये स्वास्थ्यवृत्तानभिज्ञा,
वैधेयाग्र्या वित्तवन्तो मनुष्याः ।
घोराभावा रूपवत्यो महेला, **
रूपाभावा भुञ्जते भोगपुञ्जान् ॥ ७९ ॥

सुखसौविध्यसंसक्तः पुरुषो दुर्बलायितः ।
शीततापलवेनार्तो विक्रोशति हतोहतः ॥ ८० ॥

---

* गाली, इत्यर्थः ।

** महेलामहिलयोरभेद :

विज्ञानदत्तैर्द्रविणैर्धनिष्ठः,

स्वयं दरिद्राति भृशं मनुष्यः।

यन्त्रायितो यन्त्रचयानुरक्त्या,

हिताहिते वेदितुमूनवीर्यः ॥ ८१ ॥

उद्योगशालासु वसुन्धरायाम्,

सुसाधनैर्यन्त्रशतैरपूर्वैः।

उत्पादनं नैकगुणं विधाय,

भुङ्क्ते यथाप्रार्थितमिन्द्रियार्थान् ॥ ८२ ॥

वातानुकूलायतनेषु तस्य,

घर्मो निदाघे न शरत्सु शैत्यम्।

सर्वर्तुभोग्यानि समानि सन्ति,

फलानि शीताशयरक्षितानि ॥ ८३ ॥

संचारनाशैश्चलितान्तरायै—

रेकीकृतं विश्वमिदं विशालम्।

चतुर्दिगावर्जितवृत्तवार्ताः,

लोकप्रवृत्तीः कथयन्त्यजस्रम् ॥ ८४ ॥

विहायसा गच्छति सद्विमानैः,
तरत्यकूपारममोघपोतैः ।
उच्चैः समारोहति लब्धकेण,*
डोढ़ौक्यते रेलवहैर्जवेन ।। ८५ ।।

यदा कदा भूस्खलितं विमानम्,
मङ्क्षयन्नुदन्वत्सलिले च पोतः ।
परस्परा घट्टितयानयुग्मम्,
तैक्ष्ण्यं परं शंसति कालशक्त्याः ।। ८६ ।।

कालं यथावाप्य फलन्ति वृक्षाः,
तथा प्रसूनानि विकस्वराणि ।
यथा श्रमः पक्ववयाश्चकास्ति,
तथैव पुण्यानि पुराकृतानि ।। ८७ ।।

कालं प्रतीक्षस्व कुरुष्व कर्म,
मा भूरधीरः फलदर्शनाय ।
कालक्रमाद् दैववशाज्जगत्या—
मुत्थानपातौ भवतस्त्यजाधीन् ।। ८८ ।।

* लिफ्टयानम्

काले हिमांशुः क्षयति प्रवर्धते,
काले च राहुर्ग्रसतेऽस्य मण्डलम् ।
कालेऽत्र भानोरुपसर्गविच्युती,
काले ग्रहाणामुदयास्तचंक्रमः ।। ८९ ।।

विलासवत्यः प्रमदा मनोज्ञा,
युवत्वभारेण नताः समन्तात् ।
दृप्ता वयं चेतसि साधु यूनाम्,
यामो विकत्था किमियं स्वतन्त्रा ।। ९० ।।

सुरभिपुष्पसहस्रमनोरमः,
सुभगसेव्यसमीर ऋतुः शुभः ।
किमपयाति किमैति निजेच्छया,
प्रणयिनामुत वा रुचिमीक्षते ।। ९१ ।।

कालानुशिष्टो मघवाऽम्बुवाहान्,
संक्लेदने शास्ति वसुन्धरायाः ।
आभाति विद्युत् स्तनयित्नुपूर्वा,
रटन्ति भेका जलपूरमत्ताः ।। ९२ ।।

रजांसि शान्तानि नभो विधौतम्,
सशाद्वला भूरनवद्यशोभा ।
हृष्यन्ति रोमाणि चराचराणाम्,
संस्पृश्य वातं हिमशीकरार्द्रम् ।। ९३ ।।

दिनात्यये गाढ़तमः प्रकाशम्,
विजित्य नित्यं ग्रसते जगन्ति ।
जागर्ति*कालस्य रुणद्धि चेष्टा,
भुवं प्रशान्तां विदधद् विमूढ़ाम् ।। ९४ ।।

उड्डीयमाना निलयाय वीनाम्,
पतत्रिमुख्यानुगता समष्टिः ।
सुनेतृनीता पृतनेव लघ्वी,
दृशं समालोकयतां दिनोति ।। ९५ ।।

संध्या ग्रामीणैः पञ्चषैश्चत्वरस्थैः,
गोष्ठीभिर्वृद्धैर्धूमपाने विषक्तैः ।
हासैः संलापैर्नीयमाना सुखेन,
शुश्रूषोः कृत्स्नां लोकशिक्षां विधत्ते ।। ९६ ।।

---

* जागर्तिः=जागृतिः, इति शिवरामः आप्टे ।

एतेषां ज्ञानं राजनीतेरनूनम्,

गाथाः शास्त्रीयाः कण्ठगाः सन्ति तेषाम् ।

नायं* बुध्यन्ते येन निर्वाचनानि,

जीयेरन् सम्यग् ग्रामसभ्यो हरिहि ।। ९७ ।।

निर्वाचनानि सुखशान्तिमयानि तेषाम्,

साधूनि नाम हृदयानि मलीमसानि ।

ईर्ष्यादिभिर्विदधतीह मलैर्जघन्यैः

ग्रामा विनष्टिमुपयान्ति नयप्रभावात् ।। ९८ ।।

तारावलीमण्डितकेशपाशा,

श्यामा मनोज्ञा रमणी निशाख्या ।

जागर्ति लोकेषु गतेषु निद्राम्,

प्रतीक्षमाणेव सखायमिन्दुम् ।। ९९ ।।

चन्द्रानना त्रियामेयं प्रसन्ना वरवर्णिनी ।

रौप्यवासःपिनद्धाङ्गी, कस्य नानन्दकारिणी ।। १०० ।।

---

* नायः==उपायः

स्वप्नेऽपि नानाविधचिन्तनायाम्,
प्रवर्तते नाम मनो नरस्य।
भव्यं कदाचिच्च भवच्च भूतम्,
पुराकृतं संस्मरति प्रवाहि ।। १०१ ।।

वैरेषु सख्यं च सुहृत्सु वैरम्,
व्यालाग्निवात्यासलिलोरुभीतम्।
अकिञ्चनं चापि समृद्धिमन्तम्,
स्वप्ने नरो लक्षयते स्वजीवम् ।। १०२ ।।

एवं गतागतैर्भानोर्जातं जातं विकारिसत्।
जाने कुत्र व्रजत्यन्धं यात्रा सान्ताऽस्ति नाथवा ।। १०३ ।।

भीतिर्मित्राद् भीतिः शत्रोः,
भीतीराज्याद् भीतिर्दस्योः।
भीतिः शिष्याद् भीतिः सूनो,
कृत्स्नो वृत्तो भीतिर्लोकः ।। १०४ ।।

चक्रं कालात्मनो विष्णोर्बलीयः सततं चलत्।
नूतनयति संसारं प्रसह्यपरिवर्तयत् ।। १०५

कादम्बरीं मोहमयीं निपीय,

प्रोन्मत्तवत् कार्यरतो नृलोकः ।

चक्रेणघोरेणविमृद्यमानम्,

नात्मानमालोच्य दरं बिभेति ॥ १०६ ॥

भोः कालचक्र चपल त्वरिता गतिस्ते,

द्वित्रान् क्षणान् विरमतु स्थविरा कृपालो ।

संसार एष चरणौ चकितो नतस्ते,

देहि क्लमापनयनाय निमेषमस्य ॥ १०७ ॥

परं चक्रमिदं शश्वत्संचरिष्णु स्वभावतः ।

विरंस्यति कृते कस्य, शरणं गम्यतां हरिः ॥ १०८ ॥

पिपीलिकामपि शरणार्थिनीं न य,

उपेक्षते निजजनभावमार्मिकः ।

सदीडितः स दयितबन्धुरच्युतः,

करोतु शं शमयतु वासनामलम् ॥ १०९ ॥



'वीतमृत्यु'

भूमिर्यस्य स्तुत्यभूमिः प्रकृत्या,
स्निग्धैः श्यामैर्वृक्षगुल्मैः प्रकीर्णा।
रत्नैर्दिव्यैः पूरिता धातुभिश्च,
वर्षं लोके भारतं वीतमृत्यु ॥ १ ॥

पुण्यभू जिसकी प्रकृति से भू सदा,
स्निग्ध श्यामल वृक्षगुल्मों से सजी,
दिव्य रत्नों धातुओं से है भरी,
विश्व में है अमर भारतवर्ष वह ॥

यस्याजस्रं पुण्यतोया वहन्ति,
नद्यो गङ्गासूर्यजानर्मदाद्याः।
उच्चा यत्काः सानुमन्तः पृथिव्याम्,
वर्षं लोके भारतं वीतमृत्यु ॥ २ ॥

हैं पुण्यतोया सरित् जिसकी सदा,
नर्मदा भागीरथी यमुना प्रभृति,
लोक में हैं उच्चतम जिसके शिखर,
विश्व में है अमर भारतवर्ष वह।

आर्या यस्मिन् योगिनः संबभूवुः,
भूतं भव्यं वर्तमानं विदुः स्म।
भद्रं येभ्यस्तस्थुषां जङ्गमानाम्,
वर्षं लोके भारतं वीतमृत्यु ॥ ३ ॥

जन्म जिसमें आर्य सन्तों ने लिया,
कालत्रय का वृत्त जो थे जानते,
हित चराचर का हुआ जिनसे सदा,
विश्व में है अमर भारतवर्ष वह।

यस्योत्सङ्गे क्रीडितं विश्ववंद्यैः,
प्रेक्षावद्भिर्मन्त्रकृद्भिः सुखेन।
नवायामो लभ्यते यन्महिम्नो,
वर्षं लोके भारतं वीतमृत्यु ॥ ४ ॥

गोद में जिसकी पले सुख से अहो,
मन्त्रकृत् जगवन्द्य ऋषिगण थे सुधी,
महत्ता जिसकी अमित-आयाम है,
विश्व में है अमर भारतवर्ष वह।

जन्ये जन्ये येन विक्रान्तमुग्रम्,
शत्रोर्भूत्वा नागपाशेन कण्ठे।
नैवादेयं यस्य किञ्चित् सुहृद्भ्यो,
वर्षं लोके भारतं वीतमृत्यु ।। ५ ।।

उग्र विक्रम युद्ध में जिसने किया,
बन गया अहिबन्ध जो रिपुकण्ठ में,
मित्र को सर्वस्व जिसका देय है,
विश्व में है अमर भारतवर्ष वह।

नैका यस्मिन् सभ्यताः सम्मिलन्ति,
धारा मन्ये संगताः स्युः सहस्रम्।
नानाशाखः सद्वटो नूनमेको,
वर्षं लोके भारतं वीतमृत्यु ।। ६ ।।

विपुल संस्कृति संगमन जिसमें हुआ,
ज्यों सहस्रों आ मिलीं नदियाँ अहो,
विपुल विस्तृत एक बरगद भव्य जो,
विश्व में है अमर भारतवर्ष वह।

एको देवः सर्वभूतेषु गूढ़ः,
पूर्वैर्नूनं यस्य दृष्टः पुरस्तात् ।
बन्धुर्भूता सर्वतो यस्य धात्री,
वर्षं लोके भारतं वीतमृत्यु ॥ ७ ॥

एक ही है देव अग-जग में रमा,
ज्ञात जिसके पूर्वजों को था हुआ,
है धरा जिसके लिए परिवार ही,
विश्व में है अमर भारतवर्ष वह ।

द्विड्भर्यत्का दण्डिता साधुतैव,
भेदावर्ते सन्ततिर्यस्यमग्ना ।
सत्ता धात्रा रक्षिता किन्तु यस्य,
वर्षं लोके भारतं वीतमृत्यु ॥ ८ ॥

मात्र जिसकी साधुता रिपु से डँडी,
प्रजा भेदावर्त्त में जिसकी फँसी,
रख लिया जिसको विधाता ने स्वयं,
विश्व में है अमर भारतवर्ष वह ।

शान्त्यैलोको यन्मुखं पश्यतीह,
विश्वं येनान्वीक्षितं सर्वरूपम् ।
गाढाश्चर्यं वीक्ष्यमाणं मनुष्यैः
वर्षं लोके भारतं वीतमृत्यु ॥ ६ ॥

शान्ति-हित जिसका निरखता मुख जगत्,
जो समझता उसे दृष्टि समग्र से,
अन्य जिसको देखते साश्चर्य हैं,
विश्व में है अमर भारतवर्ष वह ।

